नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

**VU—33–2—Sahit. Shas. II**

# वरिष्ठ उपाध्याय परीक्षा, 2010

## साहित्यशास्त्रम्

## द्वितीयपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथमप्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येकं भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरम् उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयम् ।

| **प्रश्न क्रमाङ्कः** | **समुचित उत्तराक्षरम्** |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) मेघदूते मुख्यरसोऽभिव्यक्तोऽस्ति —
   (अ) श्रृंगार: (ब) करुण:
   (स) वीर: (द) शान्त: । 1
   (ii) बन्धुप्रीत्यासमरविमुख: आसीत् —
   (अ) श्रीकृष्ण: (ब) बलराम:
   (स) परशुराम: (द) धृतराष्ट्र: । 1
   (iii) पार्वत्या: मातुर्नाम आसीत् —
   (अ) शकुन्तला (ब) अनुसूया
   (स) मेना (द) लोपामुद्रा । 1
   (iv) भगणस्योदाहरणमस्ति —
   (अ) विमाता (ब) सरला
   (स) ज्ञानानि (द) गच्छति । 1
2. मेघे आरूढे क: पर्वत: भुव:स्तन इव दशां यास्यति ? 1
3. पठितग्रन्थानुसारं का नाम नगरी यक्षेश्वराणामासीत् ? 1
4. शिरीषपुष्पं कस्य पदं सहते ? 1
5. कुमारसंभवानुसारं कीदृशं चिताभस्मरजोऽम्बरौकसां मौलिभि: विलिप्यते ? 1
6. ''भवति'' इत्यत्र को नाम गणोऽस्ति ? 1
7. यक्ष: केषां वंशे जातं मेघं मघोन: प्रकृतिपुरुषं जानाति ? $1\frac{1}{2}$
8. केषाम् अभ्युपेतार्थकृत्या: जना: न मन्दायन्ते ? $1\frac{1}{2}$
9. सारंगा: मेघस्य मार्गं कथं सूचयिष्यन्ति ? $1\frac{1}{2}$
10. मेघे जलमादातुमवनते चर्मण्वत्या: दर्शनीयां भाविनीं शोभां वर्णयत । $1\frac{1}{2}$
11. स्वकुशलमयीं वार्तां प्रेषयितुकाम: यक्ष: मेघस्य कीदृशं स्वागतं व्याजहार ? 2
12. कीदृशा: राजहंसा: कैलाशपर्यन्तं मेघस्य सहाया: भविष्यन्ति ? चित्रयत । 2
13. मेघेन प्राप्स्यमाणस्य कुरुक्षेत्रस्य वर्णनं कुरुत । 2
14. पार्वत्या: आश्रमे प्रविशत: ब्रह्मचारिण: सजीवं वर्णनं कुरुत । 2
15. समवृत्तस्य लक्षणं विलिख्य तस्योदाहरणमपि लिखत । 2
16. ''रिक्त: सर्वो भवति हि लघु: पूर्णता गौरवाय'' सूक्ते: सप्रसंगं भावार्थो लेख्य: । 2
17. सप्रसङ्गान्वयछन्दोऽलंकारपूर्वकं व्याख्या कार्या — $2 \times (1 + \frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 3) = 11$

(अ) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां,
वामश्चायं नदति मधुरं चातकस्ते सगन्ध: ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला:,
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाका: ॥

**अथवा**

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञै:,
प्रीतिस्निग्धैर्जनपदवधूलोचनै: पीयमान: ।
सद्य: सीरोत्कषणसुरभिक्षेत्रमारुह्य मालं,
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥

(ब) तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं,
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ॥
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात् ,
सभ्रूभंगं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥

**अथवा**

तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां,
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोदगारमुच्चैर्विमाना,
मुक्ताजालग्रथितमलकं कामिनी याभ्रवृन्दम् ॥

18. निम्नाङ्कितेषु यथेष्टं **द्वयोः** श्लोकयोः सप्रसंगं भावार्थो लेख्यः — 2 × ( 1 + 3 ) = 8

(अ) कश्चित्कान्ताविरहगुरुणा स्वाधिकाराप्रमत्तः,
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु ,
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

(ब) गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं,
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी,
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥

(स) गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने,
छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्
मोघीकर्त्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥

19. प्रसङ्गान्वयछन्दोऽलंकारपूर्वकं व्याख्या विधेया — $2 \times \left(\frac{1}{2} + \frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 2\right) = 8$

(अ) इयेष सा कर्तुमबन्ध्यरूपतां, समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं, तथाविधं प्रेम पतिश्च तादृशः ॥

**अथवा**

स्वयंविशीर्णद्रुमपर्णवृत्तिता, परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां, वदन्त्यपर्णेति च तां पुराविदः ॥

(ब) यदुच्यते पार्वति ! पापवृत्तये, न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने, तपस्विनामप्युपदेशतां गतम् ॥

**अथवा**

द्वयं गतं सम्प्रति शोचनीयतां, समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत-स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

20. निम्नलिखितेषु छन्दःसु यथेष्टं **द्वयोः** गणप्रदर्शनपूर्वकं लक्षणोदाहरणानि लेख्यानि —
2 × ( 1 + 1 + 1 ) = 6

(अ) चन्द्रलेखा (ब) हरिणप्लुता (स) रथोद्धता ।